विषय कोड 1019

# पूर्वमध्यमा द्वितीयखण्ड पुराणेतिहास:

"प्रश्न बैंक"

Date:
P. No:

प्र० 1- (वस्तुनिष्ठ-प्रश्ना:) उचितं विकल्पं चिनुत —

क- कृष्णद्वैपायनस्य कृतिरस्ति -
अ- अध्यात्मरामायणम् ब- आनन्दरामायणम्
स- रामायणम् द - महाभारतम्

ख- महाभारते कति पर्वाणि प्राप्यन्ते -
अ- 12 ब- 15
स- 18 द- 21

ग- महाभारतस्य नामान्तरम् अस्ति —
अ- शतसाहस्त्री: ब- सप्तशती
स- चतुर्विंशतिसाहस्त्री द- सप्तसप्तति:

घ- काव्यमिदं 'महाभारतम्' इत्युच्यते -
अ- जयकाव्यम् ब- विजयकाव्यम्
स- नलचम्पू: द- धृतराष्ट्रकाव्यम्

ङ० विदुरोपाख्यानस्य वर्णनं दृश्यते —
अ- मनोविज्ञाने ब - महाभारते
स- रामायणे द- चिकित्साशास्त्रे

च- पुराणेषु प्राप्यते -
अ- एकेश्वरवाद: ब - द्वैतवाद:
स- भूतेश्वरवाद: द- सर्वेश्वरवाद:

छ- अग्निपुराणम् कथ्यते -
अ- शब्दकोष: ब- विश्वकोष:
स- अमरकोष: द- वित्तकोष:

ज- कस्मिन् पुराणे सर्वा: विद्या: प्रदर्शिता ?
अ- ब्रह्मपुराणे ब - वामनपुराणे
स- वराहपुराणे द- अग्निपुराणे

झ- सूतपुत्र: क: ?
अ- विदुर: ब- दुर्योधन:
स- कर्ण: द- भीष्म:

Date:
P. No:

ञ- श्रीमद्भागवतपुराणे कति स्कन्धाः सन्ति ।

अ- नव ब- दश

स- एकादश द- द्वादश

प्र०२- रिक्तस्थानानि पूरयत -

क- प्रवेशय महाप्राज्ञं ---- दीर्घदर्शिनम् ।

ख- अभियुक्तं बलवता ---- हीनसाधनम् ।

ग- दुर्योधने सौबले च कर्णे ---- तथा ।

घ- यमर्थान् नापकर्षन्ति सर्वे ---- उच्यते ।

ङ- अश्रुतश्च समुन्नद्धो दरिद्रश्च ---- ।

च- पुरातनस्य कल्पस्य ---- विदुर्बुधा ।

छ- वैदिक आख्यानकानाम् ---- पुराणम् ।

ज- इतिहास-पुराणाभ्यां ---- समुपबृंहयेत् ।

झ- ---- सर्वाण्यपि ज्ञातव्य वस्तूनि वर्णितानि ।

ञ- अनापलिंगकुल्कानि पुराणानि ---- ।

प्र०३ उचितमेलनम् कुरुत -

| | 'अ' | | 'ब' |
|---|---|---|---|
| क | विदुरोपाख्यानम् | I. | सप्त |
| ख. | कुलपर्वताः | II. | उत्तरखण्डे |
| ग. | सप्तस्रोत | III. | महाभारतम् |
| घ. | स्वायम्भुवः | IV. | द्रौपदी |
| ङ. | पाञ्चाली | V. | मुखं |
| च- | व्याकरणम् | VI. | मनुः |
| छ- | वेदाः | VII. | षड् |
| ज. | यास्कः | VIII. | चत्वारः |
| झ. | वेदाङ्ग | IX. | निरुक्तः |
| ञ- | स्वाहा | X. | भीष्मः |
| य | शान्तनु | XI. | अग्नेः |

प्र०4. सत्यमसत्यं लिखत —
क- हस्तिनापुरस्य अपरः नाम इन्द्रप्रस्थः अस्ति ।
ख- महाभारते शीलनिरूपणोऽध्यायः नास्ति ।
ग- अर्जुनस्य अपरः नाम किरीटी अस्ति ।
घ- गान्धारी धृतराष्ट्रस्य भार्या आसीत् ।
ङ० 'ब्र' अक्षरात् त्रीणि पुराणानि सन्ति ।
च- धर्मार्थकाममोक्षाः इति पुरुषार्थचतुष्टयम् मन्यते ।
छ- जीवलोकस्य षट्सुखेषु अर्थकरीविद्या नास्ति ।
ज- स्वस्थे चित्ते बुद्धयः प्रस्फुरन्ति ।
झ- मन्त्रब्राह्मणयोर्वेदनामधेयम् ।
ञ- पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्ना प्रकाशिता ।

प्र०5- एकपदेन उत्तरत —
क- महाभारतस्य विकासक्रमः कतिधा विभक्तः ?
ख- विदुरः कस्मिन् युगे अभवन् ?
ग- नराः कोपात् कीदृशी वाचं व्यावहरन्ते ?
घ- कालस्य गतिः कः जानाति ?
ङ- दासीपुत्रः कः ?
च- धृतराष्ट्रः कस्य पिता आसीत् ?
छ- वेदव्यासस्य पितुःनाम किम् अस्ति ?
ज- पञ्चलक्षणम् इति कस्य कृते उक्तम् ?
झ- पुराणशब्दस्य अर्थः किम् ?
ञ- 'प्रतिसर्गस्य' शब्दस्य अर्थः लिखत ?

प्र०6 एकवाक्येन उत्तरत —
क- किम् नाम पंचमो वेदः ?
ख- सर्वमान्य-मुख्य-पुराणानि कति सन्ति ?
ग- पुराणशब्दस्य व्युत्पत्तिः लिखत ?
घ- पुराणस्य पंचलक्षणेषु के-के सम्मिलिता सन्ति ?
ङ- व्यासस्य वचनद्वयम् किम् ?
च- सर्गः विषये लिखत ?

छ- जयकाव्ये कति श्लोकसंख्याः प्राप्यते ?

ज- जयकाव्यस्य वक्ता कः वर्तते ?

झ- भारते कति श्लोकाः सन्ति ?

ञ- महाभारते श्लोकसंख्याः कति सन्ति ?

प्र०6. दीर्घोत्तरीया प्रश्नाः

क- पुराणानाम् महत्वं लिखत ?

ख- महाभारतः पञ्चमो वेदः इति साधयति ?

ग- अग्निपुराणे विषये मन्तव्यानि लिखत ?

घ- प्रयागस्य महत्वम् लिखत ?

ङ- नदीनाम् महत्वम् लिखत ?

प्र०7. संस्कृते व्याख्या लिखत ?

क- जरा रूपं हरति हि धैर्यमाशा मृत्युः प्राणान् धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा ह्रियं कामः सर्वमेवाभिमानः ॥

ख- यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तथा तथाऽस्य सर्वार्थाः सिद्ध्यन्ते नात्र संशयः ॥

ग- सा तु बुद्धिः कृताप्येवं पाण्डवान् प्रति मे सदा ।
दुर्योधनं समासाद्य पुनर्विपरिवर्तते ॥

घ- कामक्रोध ग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥

ङ- सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेत् विद्यां विद्यार्थी वा त्यजेत् सुखम् ॥

च- षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

छ- पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभः ॥

ज- त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥

—x—x—x—

Date:
P. No:

## :- आदर्श उत्तर :-

अचित विकल्पः :-

उ॰1. क- महाभारतम्

ख- 18

ग- शतसाहस्त्री

घ- जयकाव्यम्

ङ- महाभारते

च- एकेश्वरवादः

छ- विश्वकोषः

ज- अग्निपुराणे

झ- कर्णः

ञ- द्वादश

उ॰2. रिक्त स्थानानि—

क- विदुरः

ख- दुर्बलं

ग- दुःशासने

घ- पण्डितः

ङ- महामना

च- पुराणानि

छ- उपनिबन्धनम्

ज- वेदं

झ- अग्निपुराणे

ञ- प्रचक्षते

उ॰3 युग्मेलनम् —:

क- iii महाभारतम्

ख- i सप्त

ग- ii उत्तराखण्डे

घ- vi मनुः

ङ- iv द्रौपदी

च- v मुखं

छ- viii चत्वारः

Date:
P. No:

ज- IX निरुक्तः
झ- VII षड्
ञ- XI अग्नेः
य- X भीष्मः

3.4- आम् / न (सत्यम् / असत्यम्)
क- सत्यम्
ख- असत्यम्
ग- सत्यम्
घ- सत्यम्
ङ- सत्यम्
च- सत्यम्
छ- असत्यम्
ज- सत्यम्
झ- सत्यम्
ञ- सत्यम्

3.5- एकपदेन उत्तराणि -
क- त्रिधा
ख- द्वापरयुगे
ग- हृदयहारिणीम्
घ- विदुरः
ङ- विदुरः
च- दुर्योधनस्य / दुःशासनस्य
छ- पराशरः
ज- पुराणम्
झ- प्राचीनः
ञ- प्रलयः

3.6. एकवाक्येन उत्तराणि -
क- पुराणम् नाम पंचमो वेदः। यतोक्तम् 'इतिहासपुराणानि पंचमो वेदः'।

ख- अष्टादश-मुख्य-पुराणानि सन्ति, ये सर्वमान्याः प्राचीनाश्च सन्ति ।
ग- पुरा अर्थेषु आनयति इति पुराणम् अथवा पुरा एतद् अभूद् इति पुराणम् ।
घ- सर्गः, प्रतिसर्गः, वंशः, मन्वन्तराणि, वंशानुचरितम् च इमे पंच पुराण-
लक्षणाः सन्ति ।
ङ- अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
च- सृष्ट्युत्पत्तिवर्णनम्
छ- जयकाव्ये 8800 श्लोकसंख्या प्राप्यते ।
ज- जयकाव्यस्य वक्ता बादरायणः वर्तते ।
झ- भारते 24000 श्लोकाः सन्ति ।
ञ- महाभारते 100000 श्लोकसंख्या सन्ति ।
प्र० 6- दीर्घोत्तरीयाप्रश्नाः
क- भारतदेशे पुराणानां महत्वम् इतिहास संस्कृति भाषा काव्यदृष्ट्या सर्वविदितमस्ति । पुराणेषु संस्कृतेः सामाजिकजीवनस्य च विविधानाम् अङ्गानां वर्णनं साङ्गोपाङ्ग प्राप्नोति । पुराणानां धार्मिकदृष्ट्या महत्वमधिकम् । पुराणानि राज्ञां वृत्तेः सह ऋषीणामपि वृत्तं बोधयन्ति । पुराणानि भौगोलिकसामग्रीम अपि प्रस्तुवन्ति ।
ख- महाभारतस्य प्रणेता महर्षिः वेदव्यासः अस्ति । अस्मिन् एकलक्ष-श्लोकाः सन्ति । अस्मिन् अष्टादशपर्वाणि सन्ति । महर्षि वेदव्यासेन वीरशान्तरसयुक्तं 'महाभारतम्' इति ऐतिहासिक काव्यं विरचितम् । अत्र कौरवपाण्डवानां पारस्परिक-संघर्षस्य वर्णनं प्रोक्तम् अपि च धर्मार्थकाममोक्षादयः पुरुषार्थाः पुराण- इतिवृत- धर्मशास्त्र-अर्थशास्त्र राजनीति -ज्ञानविज्ञान - कला - शिल्पादयः अनेकाः विषयाः समाविष्टा
ग- श्रियं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् ।
ब्रह्माणं वह्निमिन्द्रादीन् वासुदेवं नमाम्यहम् ॥
नैमिषे हरिमीजाना ऋषयः शौनकादयः ।
तीर्थयात्रा प्रसङ्गेन स्वागतं सूतमब्रुवन् ॥
~~त्रिविधं ब्रह्म वक्ष्यामि शृणु~~ ॐ महाज्वालाय विद्महे अग्निमध्याय धीमहि । तन्नोः अग्निः प्रचोदयात् ।

Date:
P. No: 329

घ- वक्ष्ये प्रयागमाहात्म्यं भुक्तिमुक्तिप्रदं परम् । प्रयागे ब्रह्मविष्णवाद्या देवा मुनिवराः स्थिताः । सरितः सागराः सिद्धा गन्धर्वाप्सरसस्तथा । तत्र त्रीण्यग्निकुण्डानि तेषां मध्ये तु जाह्नवी । वेगेन समतिक्रान्ता सर्वतीर्थपुरस्कृता । तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुताः । तत्र वेदाश्च यज्ञाश्च मूर्तिमन्तः प्रयागके । प्रयागे सङ्गमे दानं श्राद्धं जप्यादि चाक्षयम् ।

ङ- भारतवर्षस्य सर्वासां नदीनां गङ्गा श्रेष्ठा पुण्यतमा, देवी च सामन्यते भागीरथी जाह्नवी चेत्यप्यस्या एव द्वे अपरे नाम्नी । नद्याः जलप्रवाहेण जलविद्युतः यन्त्रालये विद्युदुत्पादनं भवति । नदी पर्यावरणस्य महत्वपूर्णम् अङ्गम् अस्ति । नदी मनुष्येभ्यः अतीव महत्वपूर्णा अस्ति । नद्याः बहवः जलचराः वसन्ति । यत्र नदी वहति तत्र सा बहुभ्यः जीवेभ्यः जीवनदानं करोति । सत्यम् एव उक्तम्- परोपकाराय वहन्ति नद्यः ।

═══ x ═══ x ═══


Usingh
डॉ. उषा सिंह
प्राचार्य
शा.क.न्या हाईस्कूल नटेरन
जिला- विदिशा